# yAjuShI mRityulAngUlavidyopaniShat

# યાજુષી મૃત્યુલાઙ્ગૂલવિદ્યોપનિષત્

## Document Information

Text title : mRRityulAngUlavidyopaniShad

File name : mRRityulAngUlavidyopaniShat.itx

Category : upanishhat

Location : doc_upanishhat

Transliterated by : DPD, help from Alex

Proofread by : DPD

Latest update : March 6, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# યાજુષી મૃત્યુલાઙ્ગૂલવિદ્યોપનિષત્

ૐ સહનાવવતુ ॥ સહનૌભુનક્તુ ॥

સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાંતિઃ । શાંતિઃ ॥ શાંતિઃ ॥।

ૐ એકદા મહાકૈલાસે સુખાસીનં મહાદેવમુપગમ્ય પ્રણિપત્ય
ભો ભગવન્ મૃત્યુલાઙ્ગૂલવિદ્યામનુબ્રૂહીત્યુવાચ વસિષ્ઠઃ ।
અથાહ ભગવાન્મહાદેવો મૃત્યુલાઙ્ગુલવિદ્યાં વક્ષ્યામીતિ ।
મૃત્યોસ્સમયાવબોધનાત્ મૃત્યુલાઙ્ગુલમિત્યુચ્યતે ।

અસ્યાઃ શ્રીમૃત્યુલાઙ્ગૂલવિદ્યાયાઃ ઉલૂકનાઙ્ગનો ભગવાનૃષિઃ ।
અનુષ્ટુપ્છન્દઃ । મૃત્યુલાઙ્ગૂલો દેવતા । ક્લામિત્યાદિન્યાસાઃ ।

॥ ધ્યાનમ્ ॥

નીલપર્વતસઙ્કાશ રુદ્રકોપસમુદ્ભવ ।
કાલદણ્ડધર શ્રીમન્વૈવસ્વત નમોઽસ્તુ તે ॥

અથાતો યોગવિન્યાસો મધુવાદિની અહઙ્કારો નાહઙ્કારસ્ય ॥

ઋતઁ સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણ પિઙ્ગલમ્ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપાય વૈ નમો નમઃ ॥

લમિત્યાદિપઞ્ચપૂજા ।

ઇયં વિદ્યા સાયમ્પ્રાતઃ સન્ધ્યયોરુપસ્થાનાત્પૂર્વં
વિસ્તૃતાઙ્ગુષ્ઠતર્જનીમુદ્રયા સવ્યં પાણિં ભૂમૌ વિન્યસ્ય
દક્ષિણાભિમુખં શિષ્ટૈર્જપ્યતે । સ્વાન્ત્યકાલ જ્ઞાનમપિ
સુકરમસ્યા જપાનુષ્ઠાનેન ઇત્યપ્યાહુશ્ચ માન્ત્રિકાઃ ॥

॥ મૂલમન્ત્રઃ ॥

ૐ નમો ભગવતે ઉમાપતયે વરવૃષભ ફેનકપોલાય
પશુપતયે નમો નમઃ ॥

ઇતિ સ્મૃતે મૃત્યુલાઙ્ગૂલે બ્રહ્મહાઽબ્રહ્મહા ભવતિ ।
સ્વર્ણસ્તેયી અસ્તેયી ભવતિ । સુરાપાયી અપાયી ભવતિ ।
ગુરુતલ્પગામી અગામી ભવતિ । અબ્રહ્મચારી સુબ્રહ્મચારી ભવતિ ।
એકવારેણ જપિત્વા અષ્ટોત્તર શતસહસ્રલક્ષ ગાયત્રી જપ ફલાનિ ભવન્તિ ।
અષ્ટૌ બ્રાહ્મણાન્ સમ્યક્ગ્રાહયિત્વા- બ્રહ્મ લોકમવાપ્નોતિ ।
યદિ કશ્ચિન્ન બ્રૂયાત્ - કુષ્ઠી કુનખી ભવતિ ।
દીયમાનો ન ગૃહ્ણીયાત્ અન્ધો ભવતિ । ષડ્ભિર્માસૈઃ પ્રમુચ્યતે ।
સ્ત્રીણાં યોનૌ - અહરહઃ પ્રયુઞ્જાનઃ સર્વાત્પાપાત્પૂતો ભવતિ ।
મૃત્યુઃ પ્રીયતામ્ । મૃત્યુર્નીલકણ્ઠઃ । અપરિમિતમાયુર્ભવતિ ।
શતવર્ષાણિ જીવન્તિ । નશ્યતિ મન્ત્રો નશ્યતિ તન્ત્રો નશ્યતિ યન્ત્રઃ ।
ન ચ પુનરાવૃત્યા । યદિ પુનરાવૃત્યા ઋષીણાં કુલે મહામેધાવી ભવતિ ।
ઇત્યાહ ભગવાન્મહાદેવો વસિષ્ઠાયેત્યુપનિષત્ ॥

ૐ સહનાવવતુ ॥ સહનૌભુનક્તુ ॥

સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાંતિઃ । શાંતિઃ ॥ શાંતિઃ ॥।

Proofread by DPD

*yAjuShI mRityulAngUlavidyopaniShat*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*